# শ্রীলাকিনীসহস্রনামস্তোত্রম্

{॥ শ্রীলাকিনীসহস্রনামস্তোত্রম্ ॥}

শ্রীগণেশায নমঃ ।

আনন্দভৈরবী উবাচ ।

অথ সন্তেদনার্থায বক্ষ্যে ষটপঙ্কজস্য চ ।

মহারুদ্রস্য দেবস্য শ্রী শ্রীমৃত্যুঞ্জযস্য চ ॥ ১॥

লাকিনী শক্তিসহিতং সহস্রনামমঙ্গলম্ ।

অষ্টোত্তরশতব্যাপ্তং নিগূঢং ভব সিদ্ধযে ॥ ২॥

ধারযিত্বা পঠিত্বা চ শ্রুত্বা বা নামমঙ্গলম্ ।

শৃণুষ্ব পরমানন্দ যোগেন্দ্র চন্দ্রশেখর ॥ ৩॥

তবাহ্লাদপ্রণযনাত্ সর্বসম্পত্তিপ্রাপ্তযে ।

মণিযোগসুসিদ্ধ্যর্থং সাবধানাঽবধারয ॥ ৪॥

অষ্টোত্তরসহস্রনামমঙ্গলস্য কহোড

ঋষির্গাযত্রীচ্ছন্দো মহারুদ্রমৃত্যুঞ্জযলাকিনী সরস্বতীদেবতা

সর্বাভীষ্টশচীপীঠযোগসিদ্ধ্যর্থে বিনিযোগঃ ।

ওঁ মৃত্যুঞ্জয রুদ্রাদি লাকিন্যাদি সরস্বতী ।

মৃত্যুজেতা মহারৌদ্রী মহারুদ্রসরস্বতী ॥ ৫॥

মহারৌদ্রো মৃত্যুহরো মহামণিবিভূষিতা ।
মহাদেবো মহাবক্ত্রো মহামায়া মহেশ্বরী ॥ ৬॥

মহাবীরো মহাকালো মহাচণ্ডেশ্বরী স্নুষা ।
মহাবাতো মহাভেদো বীরভদ্রা মহাতুরা ॥ ৭॥

মহাচণ্ডেশ্বরো মীনো মণিপূরপ্রকাশিকা ।
মহামত্তো মহারাত্রো মহাবীরাসনস্থিতা ॥ ৮॥

মায়াবী মারহন্তা চ মাতঙ্গী মঙ্গলেশ্বরী ।
মৃত্যুহারী মুনিশ্রেষ্ঠা মনোহারী মনোযবা ॥ ৯॥

মণ্ডলস্থো মনীলাঙ্গো মান্যা মোহনমৌলিনী ।
মত্তবেশো মহাবাণো মহাবলা মহালযা ॥ ১০॥

মারী হারী মহামারী মদিরামত্তগামিনী ।
মহামায়াশ্রয়ো মৌনী মহামায়া মরুৎপ্রিযা ॥ ১১॥

মুদ্রাশী মদিরাপী চ মনোযোগা মহোদযা ।
মাংসাশী মীনভক্ষশ্চ মোহিনী মেঘবাহনা ॥ ১২॥

মানভঙ্গপ্রিয়ো মান্যা মহামান্যো মহাবলা ।

মহাবাণধরো মুখ্যো মহাবিদ্যা মহীর্যসী ॥ ১৩॥

মহাশূলধরোঽনন্তো মহাবলী মহাকুলা ।
মলযাদ্রিনিবাসী চ মতির্মালাসনপ্রিযা ॥ ১৪॥

মাযাপতির্মহারুদ্রো মরুণাহতকারিণী ।
মালাধারী শঙ্খমালী মঞ্জুরী মাংসভক্ষিণী ॥ ১৫॥

মহালক্ষণসম্পন্নো মহালক্ষণলক্ষণা ।
মহাজ্ঞানী মহাবেগী মৌষলী মুষলপ্রিযা ॥ ১৬॥

মহোখ্যো মালিনীনাথো মন্দরাদ্রিনিবাসিনী ।
মৌনীনামন্তরস্থশ্চ মানভঙ্গা মনঃস্বিনী ॥ ১৭॥

মহাবিদ্যাপতির্মধ্যো মধ্যে পর্বতবাসিনী ।
মদিরাপো মন্দহরো মদনামদনাসনা ॥ ১৮॥

মদনস্থো মদক্ষেত্রো মহাহিমনিবাসিনী ।
মহান্ মহাত্মা মাঙ্গল্যো মহামঙ্গলধারিণী ॥ ১৯॥

মহাহীনশরীরশ্চ মনোহরতদুদ্ভবা ।
মাযাশক্তিপতির্মোহা মহামোহনিবাসিনী ॥ ২০॥

মহচ্চিতো নির্মলাত্মা মহতামশুচিস্থিত ।

মত্তকুঞ্জরপৃষ্ঠস্থো মত্তকুঞ্জরগামিনী ॥ ২১॥

মকরো মরুতানন্দো মাকরী মৃগপূজিতা ।

মণীপূজ্যা মনোরূপী মেদমাংসবিভোজিনী ॥ ২২॥

মহাকামী মহাধীরো মহামহিষমর্দিনী ।

মহিষাসুরবুদ্ধিস্থো মহিষাসুরনাশিনী ॥ ২৩॥

মহিষস্থো মহেশস্থো মধুকৈটভনাশিনী ।

মধুনাথশ্চ মধুপো মধুমাংসাদিসিদ্ধিদা ॥ ২৪॥

মহাভৈরবপূজ্যশ্চ মহাভৈরবপূজিতা ।

মহাকান্তি প্রিযানন্দো মহাকান্তিস্থিতাঽমরা ॥ ২৫॥

মালাকোটিধরো মালো মুণ্ডমালাবিভূষিতা ।

মণ্ডলজ্ঞাননিরতো মণিমণ্ডলবাসিনী ॥ ২৬॥

মহাবিভূতিক্রোধস্থো মিথ্যাদোষসরস্বতী ।

মেরুস্থো মেরুনিলয মেনকানুজরূপিণি ॥ ২৭॥

মহাশৈলাসন মেরুমোহিনী মেঘবাহিনী ।

মঞ্জুঘোষো মঞ্জুনাথো মোহমুদ্গরধারিণী ॥ ২৮॥

মেঢ্রস্থো মণিপীঠস্থো মূলরূপা মনোহরা ।

মঙ্গলার্থো মহাযোগী মত্তমেহসমুদ্ভবা ॥ ২৯॥

মতিস্থিত মনোমানো মনোমাতা মহোন্মনী ।

মন্দবুদ্ধিহরো মৃত্যুর্মৃত্যুহন্ত্রী মনঃপ্রিয়া ॥ ৩০॥

মহাভক্তো মহাশক্তো মহাশক্তির্মদাতুরা ।

মণিপুরপ্রকাশশ্চ মণিপুরবিভেদিনী ॥ ৩১॥

মকারকূটনিলযো মানা মানমনোহরী ।

মাক্ষরো মাতৃকাবর্ণোং মাতৃকাবীজমালিনী ॥ ৩২॥

মহাতেজা মহারশ্মির্মন্ব্যগ স্যান্ মধুপ্রিয়া ।

মধুমাংসসমুৎপন্নো মধুমাংসবিহারিণী ॥ ৩৩॥

মৈথুনানন্দনিরতো মৈথুনালাপমোহিনী ।

মুরারিপ্রেমসংতুষ্টো মুরারিকরসেবিতা ॥ ৩৪॥

মাল্যচন্দনদিগ্ধাঙ্গো মালিনী মন্ত্রজীবিকা ।

মন্ত্রজালস্থিতো মন্ত্রী মন্ত্রিণাংমন্ত্রসিদ্ধিদা ॥ ৩৫॥

মন্ত্রচৈতন্যকারী চ মন্ত্রসিদ্ধিপ্রিয়া সতী ।

মহাতীর্থপ্রিয়ো মেষো মহাসিংহাসনস্থিতা ॥ ৩৬॥

মহাক্রোধসমুৎপন্নো মহতী বুদ্ধিদায়িনী ।

মরণজ্ঞানরহিতো মহামরণনাশিনী ॥ ৩৭॥

মরণোদ্ভূতহন্তা চ মহামুদ্রান্বিতা মুদা ।

মহামোদকরো মারো মারস্থা মারনাশিনী ॥ ৩৮॥

মহাহেতুহরো হর্তা মহাপুরনিবাসিনী ।

মহাকৌলিকপালশ্চ মহাদৈত্যনিবারিণী ॥ ৩৯॥

মার্তণ্ডকোটিকিরণো মৃতিহন্ত্রী মৃতিস্থিতা ।

মহাশৈলোঽমলো মায়ী মহাকালগুণোদয়া ॥ ৪০॥

মহাজয়ো মহারুদ্রো মহারুদ্রারুণাকরা ।

মনোবর্ণমৃজোমাখ্যো মুদ্রা তরুণরূপিণী ॥ ৪১॥

মুণ্ডমালাধরো মার্যো মার্যপুষ্পমৃজামনী ।

মঙ্গলপ্রেমভাবস্থা মহাবিদ্যুৎপ্রভাঽচলা ॥ ৪২॥

মুদ্রাধারী মতস্থৈর্যো মতভেদপ্রকারিণী ।

মহাপুরাণবেত্তা চ মহাপৌরাণিকাঽমৃতা ॥ ৪৩॥

মৌনবিদ্যো মহাবিদ্যা মহাধননিবাসিনী ।

মঘবা মাঘমধ্যস্থা মহাসৈন্যা মহোরগা ॥ ৪৪॥

মহাফণিধরো মাত্রা মাতৃকা মন্ত্রবাসিনী ।

মহাবিভূতিদানাঢ্যা মেরুবাহনবাহনা ॥ ৪৫॥

মহাহ্লাদো মহামিত্রো মহামৈত্রেযপূজিতা ।

মার্কণ্ডেযসিদ্ধিদাতা মার্কণ্ডেযাযুষিস্থিতা ॥ ৪৬॥

মার্কণ্ডেযো মুহুঃপ্রীতো মাতৃকামণ্ডলেশ্বরী ।

মানসংস্থো মানদাতা মনোধারণতৎপরা ॥ ৪৭॥

মযদানবচিত্তস্থো মযদানবচিত্রিণী ।

মহাগুণধরানন্দো মহালিঙ্গবিহারিণী ॥ ৪৮॥

মহেশ্বরস্থিতো মূলো মূলবিদ্যাকুলোদযা ।

মাযাপো মোহনোন্মাদী মহাগুরুনিবাসিনী ॥ ৪৯॥

মহাশুক্লাম্বরধরো মলযাগুরুধূপিতা ।

মধূপিনী মধূল্লাসো মাধ্বীরসসমাশ্রযা ॥ ৫০॥

মহাগুরুর্মহাদেহো মহোৎসাহা মহোৎপলা ।
মধ্যপঙ্কজসংস্থাতা মধ্যাম্বুজনিবাসিনী ॥ ৫১॥

মারীভযহরো মল্লো মল্লগ্রহবিরোধিনী ।
মহামুণ্ডলযোন্মাদী মদঘূর্ণীতলোচনা ॥ ৫২॥

মহাসদ্যোজাতকালো মহাকপিলবর্তীনী ।
মেঘবাহো মহাবক্ত্রো মনসামণিধারিণী ॥ ৫৩॥

মরণাশ্রযহন্তা চ মহাগুর্বীগণস্থিতা ।
মহাপদ্মস্থিতো মন্ত্রো মন্ত্রবিদ্যানিধীশ্বরী ॥ ৫৪॥

মকরাসনসংস্থাতা মহামৃত্যুবিনাশিনী ।
মোহনো মোহিনীনাথো মত্তনর্তনবাসিনী ॥ ৫৫॥

মহাকালকুলোল্লাসী মহাকামাদিনাশিনী ।
মূলপদ্মনিবাসী চ মহামূলকুলোদযা ॥ ৫৬॥

মাসাখ্যো মাংসনিলযা মঙ্গলস্থা মহাগুণা ।
মাযাছন্নতরো মীনো মীমাংসাগুণবাদিনী ॥ ৫৭॥

মীমাংসাকারকো মাযী মার্জারসিদ্ধিদাযিনী ।

মেদিনীবল্লভক্ষেমো মেদিনীজ্ঞানমোদিনী ॥ ৫৮॥

মৌষলীশ মৃষার্থস্থো মনকল্পিতকেশরী ।
মনস শ্রীধরো জাপো মন্দহাসসুশোভিতা ॥ ৫৯॥

মৈনাকো মেনকাপুত্রো মায়াছন্না মহাক্রিয়া ।
মহাক্রিয়া চ লোমাণ্ডো মণ্ডলাসনশোভিতা ॥ ৬০॥

মায়াধারণকর্তা চ মহাদ্বেষবিনাশিনী ।
মুক্তকেশী মুক্তদেহো মুক্তিদা মুক্তিমানিনী ॥ ৬১॥

মুক্তাহারধরো মুক্তো মুক্তিমার্গপ্রকাশিনী ।
মহামুক্তিক্রিয়াচ্ছন্নো মহোচ্চগিরিনন্দিনী ॥ ৬২॥

মূষলাদ্যস্ত্রহন্তা চ মহাগৌরীমনঃক্রিয়া ।
মহাধনী মহামানী মনোমত্তা মনোলয়া ॥ ৬৩॥

মহারণগত সান্তো মহাবীণাবিনোদিনী ।
মহাশত্রুনিহন্তা চ মহাস্ত্রজালমালিনী ॥ ৬৪॥

শিবো রুদ্রো বলীশানী কিতবামোদবর্দ্ধিনী ।
চন্দ্রচূড়াধরো বেদো মদোন্মত্তা মহোজ্জ্বলা ॥ ৬৫॥

বিগলৎকোটিচন্দ্রাভো বিধুকোটিসমোদযা ।
অগ্নিজ্বালাধরো বীরো জ্বালামালাসহস্রধা ॥ ৬৬॥

ভর্গপ্রিযকরো ধর্মো মহাধার্মীকতৎপরা ।
ধর্মধ্বজো ধর্মকর্তা ধর্মগুপ্তি প্রসৃত্বরী ॥ ৬৭॥

মহাবিদ্রুমপূরস্থো বিদ্রুমাভাযুতপ্রভা ।
পুষ্পমালাধরো মান্যো শত্রূণাং কুলনাশিনী ॥ ৬৮॥

কোজাগরো বিসর্গস্থো বীজমালাবিভূষিতা ।
বীজচন্দ্রো বীজপূরো বীজাভা বিঘ্ননাশিনী ॥ ৬৯॥

বিশিষ্টো বিধিমোক্ষস্থো বেদাঙ্গপরিপূরিণী ।
কিরাতিনীপতি শ্রীমান্ বিজ্ঞাবিজ্ঞজনপ্রিযা ॥ ৭০॥

বর্ধস্থো বর্ধসম্পন্নো বর্ণমালাবিভূষিতা ।
মহাদ্রুমগত শূরো বিলসৎকোটিচন্দ্রভা ॥ ৭১॥

মহাকুমারনিলযো মহাকামকুমারিকা ।
কামজালক্রিযানাথো বিকলা কমলাসনা ॥ ৭২॥

খণ্ডবুদ্ধিহরো ভাবো ভবতীতি দুরাসনা ।

অসংখ্যকো রূপসংখ্যো নামসংখ্যাদিপূরণী ॥ ৭৩॥

সদ্মনাদ্যমনা কোষকিঙ্কিণীজালমালিনী ।

চন্দ্রাযুতমুখাম্ভোজো বিভাযুতসমাননা ॥ ৭৪ ॥

কালবুদ্ধিহরো বালো ভগবত্যম্বিকাঽগুজা ।

মুণ্ডহস্তশ্চাতুরাদ্যঃ বিবাদরহিতাঽবৃতা ॥ ৭৫ ॥

পঞ্চমাচারকুশলো মহাপঞ্চমলালসা ।

বিকারশূন্যো দুর্ধর্ষো দ্বিপদা মানুষক্রিযা ॥ ৭৬॥

মযদানবকর্মস্থো বিধাতৃকর্মবোধিনী ।

কলিকালক্রিযারূঢ বাযবীঘর্ঘরধ্বনি ॥ ৭৭ ॥

সর্বসঞ্চারকর্তা চ সর্বসঞ্চারকর্ত্রীকা ।

মন্দমন্দগতিপ্রেমা মন্দমন্দগতিস্থিতা ॥ ৭৮ ॥

সাট্টহাসো বিধুকলা চাঘোরাঘোরযাতনা ।

মহানরকহর্তা চ নরকাদিবিপাকহা ॥ ৭৯ ॥

পঞ্চরশ্মিসমুদ্ভূতো নগাদিবলঘাতিনী ।

গরুডাসনসম্পূজ্যো গরুডপ্রেমবর্ধীনী ॥ ৮০ ॥

অশ্বত্থবৃক্ষনিলযো বটবৃক্ষতলস্থিতা ।

চিরাঙ্গো প্রথমাবুদ্ধি প্রপঞ্চসারসঙ্গতি ॥ ৮১ ॥

স্থিতিকর্তা স্থিতিচ্ছাযা বিমদা ছত্রধারিণী ।

দাডিমাভাসকুসুমো দাডিমোদ্ভবপুষ্পিকা ॥ ৮২ ॥

দ্রাঢ্যো দ্রবীভরতিকা রতিকালাপবর্ধীনী ।

রত্নগর্ভো রত্নমালা রত্নেশ্বর ইবাগতি ॥ ৮৩॥

প্রসিদ্ধঃ পাবনী পুচ্ছা পুচ্ছসুস্থ পরাপরা ।

খেচরী খেচর স্বস্থো মহাখড্গধরা জযা ॥ ৮৪ ॥

কিশোরভাবখেলস্থো বিখনাদিপ্রকারিকা ।

মহাশব্দপ্রকাশশ্চ মহাশব্দপ্রকাশিকা ॥ ৮৫ ॥

চারুহাসো বিপধন্তা শত্রুমিত্রগণস্থিতা ।

বজ্রদণ্ডধরো ব্যাঘ্রো বিযৎখেলনখঞ্জনা ॥ ৮৬॥

গদাধর শীলধারী শশিকর্পূরগাঽবলা ।

বসনাসনকারী চ বসনাবসনপ্রিযা ॥ ৮৭॥

মহাবিদ্যাধরো গুপ্তো বিশিষ্টগোপনক্রিযা ।

গুপ্তগীতাগায়নস্থো গুপ্তশাস্ত্রগলপ্রদা ॥ ৮৮॥

যোগবিদ্যাপুরাণশ্চ যাগবিদ্যা বিভাকলা ।

এককালো দ্বিকালশ্চাত্র কালফলাম্বুজা ॥ ৮৯॥

অষ্টাদশভুজো রৌদ্রী ভুজগা বিঘ্ননাশিনী ।

বিদ্যাগোপনকারী চ বিদ্যাসিদ্ধিপ্রদায়িনী ॥ ৯০॥

বিজয়ানন্দগো মন্দো মহাকালমহেশ্বরী ।

ভূতিদানরতো মার্গোং মহদ্গীতাপ্রকাশিনী ॥ ৯১॥

কেশাদ্যাবেশসন্তানো মঙ্গলাভা কুলান্তরা ।

দ্বিভুজো বেদবাহুশ্চ ষড্ভুজা কামচারিণী ॥ ৯২॥

চন্দ্রকান্তমাল্যধরো লোকাতিলোকরাগিণী ।

ত্রিভঙ্গদেহনিকরো বিভাঙ্গস্থা বিনোদিনী ॥ ৯৩॥

ত্রিকূটস্থস্ত্রিভাবস্থস্ত্রিশরীরা ত্রিকালজা ।

একবক্ত্রো দ্বিবক্ত্রশ্চ বক্ত্রশূন্যা শিশুপ্রিয়া ॥ ৯৪॥

শ্রী বিদ্যামন্ত্রজালস্থো বিজ্ঞানী কুশলেশ্বরী ।

ঘটাসরগতো গৌরা গৌরবী গৌরিকাঽচলা ॥ ৯৫॥

গুরুজ্ঞানগতো গন্ধো গন্ধভোগ্যা গিরিধ্বজা ।

ছাযামণ্ডলমধ্যস্থো বিকটা পুষ্করাননা ॥ ৯৬॥

কামাখ্যো নিরহঙ্কার কামরূপনৃপাঙ্গজা ।

সুলভো দুর্লভো দুঃখী সূক্ষ্মাতিসূক্ষ্মরূপিণী ॥ ৯৭॥

বীজজাপপশো ক্রূরো বিমোহগুণনাশিনী ।

অর্ধরো নিপুণোল্লাশো বিভুরূপা সরস্বতী ॥ ৯৮॥

অনন্তঘোষনিলযো বিহঙ্গগণগামিনী ।

অচ্যুতেশ প্রকাণ্ডস্থ প্রচণ্ডফালবাহিনী ॥ ৯৯॥

অভ্রান্তো ভ্রান্তিরহিতা শ্রান্তো যান্তি প্রতিষ্ঠিতা ।

অব্যর্থো ব্যর্থবাক্যস্থো বিশঙ্কাশঙ্কযান্বিতা ॥ ১০০॥

যমুনাপতিপ পীনো মহাকালবসাবহা ।

জম্বূদ্বীপেশ্বর পার পারাবারকৃতাসনী ॥ ১০১॥

বজ্রদণ্ডধর শান্তো মিথ্যাগতিরতীন্দ্রিযা ।

অনন্তশযনো ন্যূনঃ পরমাহ্লাদবর্ধিনী ॥ ১০২॥

শিষ্টাশ্রণিলযো ব্যাখ্যো বসন্তকালসুপ্রিযা ।

বিরজান্দোলিতো ভিন্নো বিশুদ্ধগুণমণ্ডিতা ॥ ১০৩॥

অঞ্জনেশঃ খঞ্জনেশ পললাসবভক্ষিণী ।

অঙ্গভাষাকৃতিস্নাতা সুধারসফলাতুরা ॥ ১০৪ ॥

ফলবীজধরো দৌর্গো দ্বারপালনপল্লবা ।

পিপ্পলাদঃ কারণশ্চ বিখ্যাতিরতিবল্লভা ॥ ১০৫॥

সংহারবিগ্রহো বিপ্রো বিষণ্ণা কামরূপিণী ।

অবলাপো নাপনাপো বিক্লৃপ্তা কংসনাশিনী ॥ ১০৬॥

হঠাৎকারেণতো চামো নাচামো বিনযক্রিযা ।

সর্ব সর্বসুখাচ্ছন্নো জিতাজিতগুণোদযা ॥ ১০৭॥

ভাস্বৎকিরীটো রাঙ্কারী বরুণেশীতলান্তরা ।

অমূল্যরত্নদানাঢ্যো দিবারাত্রিস্ত্রিখগুজা ॥ ১০৮॥

মারবীজমহামানো হরবীজাদিসংস্থিতা ।

অনন্তবাসুকীশানো লাকিনী কাকিনী দ্বিধা ॥ ১০৯॥

কোটিধ্বজো বৃহদ্গর্গশ্চামুণ্ডা রণচণ্ডিকা ।

উমেশো রত্নমালেশী বিকুন্তগণপূজিতা ॥ ১১০॥

নিকুম্ভপূজিত কৃষ্ণো বিষ্ণুপত্নী সুধাত্মিকা ।

অল্পকালহরঃ কুন্তো মহাকুন্তাস্ত্রধারিণী ॥ ১১১॥

ব্রহ্মাস্ত্রধারক ক্ষিপ্তো বনমালাবিভূষিতা ।

একাক্ষর দ্বযক্ষরশ্চ ষোডশাক্ষরসম্ভবা ॥ ১১২॥

অতিগম্ভীরবাতস্থো মহাগম্ভীরবাদ্যগা ।

ত্রিবিধাত্মা ত্রিদেশাত্মা তৃতীযাত্রাণকারিণী ॥ ১১৩॥

কিযৎকালচলানন্দো বিহঙ্গগমনাসনা ।

গীর্বাণ বাণহন্তা চ বাণহস্তা বিধূচ্ছলা ॥ ১১৪॥

বিন্দুধর্মোজ্জ্বলোদারো বিযজ্জ্বলনকারিণী ।

বিবাসা ব্যাসপূজ্যশ্চ নবদেশীপ্রধানিকা ॥ ১১৫॥

বিলোলবদনো বামো বিরোমা মোদকারিণী ।

হিরণ্যহারভূষাঙ্গঃ কলিঙ্গনন্দিনীশগা ॥ ১১৬॥

অনন্যক্ষীণবক্ষশ্চ ক্ষিতিক্ষোভবিনাশিকা ।

ক্ষণক্ষেত্রপ্রসাদাঙ্গো বশিষ্ঠাদিঋষীশ্বরী ॥ ১১৭॥

রেবাতীরনিবাসী চ গঙ্গাতীরনিবাসিনী ।

চাঙ্গেশঃ পুষ্করেশশ্চ ব্যাসভাষাবিশেষিকা ॥ ১১৮॥

অমলানাথসংজ্ঞশ্চ রামেশ্বরসুপূজিতা ।

রমানাথ প্রভু প্রাপ্তি কীর্তীদুর্গাভিধানিকা ॥ ১১৯॥

লম্বোদর প্রেমকালো লম্বোদরকুলপ্রিযা ।

স্বর্গদেহো ধ্যানমানো লোচনাযতধারিণী ॥ ১২০॥

অব্যর্থবচনপ্রক্ষ্যো বিদ্যাবাগীশ্বরপ্রিযা ।

অব্দমানস্মৃতিপ্রাণ কলিঙ্গনগরেশ্বরী ॥ ১২১॥

অতিগুহ্যতরজ্ঞানী গুপ্তচন্দ্রাত্মিকাঽব্যযা ।

মণিনাগগতো গন্তা বাগীশানী বলপ্রদা ॥ ১২২॥

কুলাসনগতো নাশো বিনাশা নাশসুপ্রিযা ।

বিনাশমূলঃ কূলস্থঃ সংহারকুলকেশ্বরী ॥ ১২৩॥

ত্রিবাক্যগুণবিপ্রেন্দ্রো মহদাশ্চর্যচিত্রিণী ।

আশুতোষগুণাচ্ছন্ন মদবিহ্বলমণ্ডলা ॥ ১২৪॥

বিরূপাক্ষী লেলিহশ্চ মহামুদ্রাপ্রকাশিনী ।

অষ্টাদশাক্ষরো রুদ্রো মকরন্দসুবিন্দুগা ॥ ১২৫॥

ছত্রচামরধারী চ ছত্রদাত্রী ত্রিপৌণ্ড্রজা ।
ইন্দ্রাত্মকো বিধাতা চ ধনদা নাদকারিণী ॥ ১২৬॥

কুণ্ডলীপরমানন্দো মধুপুষ্পসমুদ্ভবা ।
বিল্ববৃক্ষস্থিতো রুদ্রো নযনাম্বুজবাসিনী ॥ ১২৭॥

হিরণ্যগর্ভ কৌমারো বিরূপাক্ষা ঋতুপ্রিযা ।
শ্রীবৃক্ষনিলযশ্যামো মহাকুলতরূদ্ভবা ॥ ১২৮॥

কুলবৃক্ষস্থিতো বিদ্বান্ হিরণ্যরজতপ্রিযা ।
কুলপঃ প্রাণপ প্রাণা পঞ্চচূডধরাধরা ॥ ১২৯॥

উষতী বেদিকানাথো নর্মধর্মবিবেচিকা ।
শীতলাপ্ত শীতহীনো মনঃস্থৈর্যকরী ক্ষযা ॥ ১৩০॥

কুক্ষিস্থ ক্ষণভঙ্গস্থো গিরিপীঠনিবাসিনী ।
অর্ধকাযঃ প্রসন্নাত্মা প্রসন্নবনবাসিনী ॥ ১৩১॥

প্রতিষ্ঠেশ প্রাণধর্মা জ্যোতীরূপা ঋতুপ্রিযা ।
ধর্মধ্বজপতাকেশো বলাকা রসবর্দ্ধীনী ॥ ১৩২॥

মেরুশৃঙ্গগতো ধূর্তো ধূর্তমত্তা খলস্পৃহা ।

সেবাসিদ্ধিপ্রদোঽনন্তোঽনন্তকার্যবিভেদিকা ॥ ১৩৩॥

ভাবিনামত্ত্বজানজ্ঞো বিরাটপীঠবাসিনী ।

বিচ্ছেদচ্ছেদভেদশ্চ ছলশ্শাস্ত্রপ্রকাশিকা ॥ ১৩৪ ॥

চারুকর্ম্যা সংস্কৃতশ্চ তপ্তহাটকরূপিণী ।

পরানন্দরসজ্ঞানী রসসন্তানমন্ত্রিণী ॥ ১৩৫॥

প্রতীক্ষ সূক্ষ্মশব্দশ্চ প্রসঙ্গসঙ্গতিপ্রিযা ।

অমাযী সাগরোদ্ভূতো বন্ধ্যাদোষবিবর্জীতা ॥ ১৩৬॥

জিতধর্মো জ্বলচ্ছত্রী ব্যাপিকা ফলবাহনা ।

ব্যাঘ্রচর্মাম্বরো যোগী মহাপীনা বরপ্রদা ॥ ১৩৭॥

বরদাতা সারদাতা জ্ঞানদা বরবাহিনী ।

চারুকেশধরো মাপো বিশালা গুণদাঽম্বরা ॥ ১৩৮॥

তাডঙ্কমালানির্মালধরস্তাডঙ্কমোহিনী ।

পঞ্চালদেশ সম্ভূতো বিশুদ্ধস্বরবল্লভা ॥ ১৩৯॥

কিরাতপূজিতো ব্যাধো মনুচিন্তাপরাযণা ।

শিব বাক্যরতো বামো ভৃগুরামকুলেশ্বরী ॥ ১৪০॥

স্বযম্ভূ কুসুমাচ্ছন্নো বিধিবিদ্যাপ্রকাশিনী ।

প্রভাকরতনূদ্ভূতো বিশল্যকরণীশ্বরী ॥ ১৪১॥

উষতীশ্বর সম্পর্কী যোগবিজ্ঞানবাসিনী ।

উত্তমো মধ্যমো ব্যাখ্যো বাচ্যাবাচ্যবরাঙ্গনা ॥ ১৪২॥

আম্বীজবাদরোষাঢ্যা মন্দরোদরকারিণী ।

কৃষ্ণসিদ্ধান্তসংস্থানো যুদ্ধসাধনচর্চীকা ॥ ১৪৩॥

মথুরাসুন্দরীনাথো মথুরাপীঠবাসিনী ।

পলাযনবিশূন্যশ্চ প্রকৃতিপ্রত্যযস্থিতা ॥ ১৪৪॥

প্রকৃতিপ্রাণনিলযো বিকৃতিজ্ঞাননাশিনী ।

সর্বশাস্ত্রবিভেদশ্চ মত্তসিংহাসনাসনা ॥ ১৪৫॥

ইতিহাসপ্রিযো ধীরো বিমলাঽমলরূপিণী ।

মণিসিংহাসনস্থশ্চ মণিপূরজযোদযা ॥ ১৪৬॥

ভদ্রকালীজপানন্দো ভদ্রাভদ্রপ্রকাশিনী ।

শ্রীভদ্রো ভদ্রনাথশ্চ ভযভঙ্গবিহিংসিনী ॥ ১৪৭॥

আত্মারামো বিধেযাত্মা শূলপাণিপ্রিযাঽন্তরা ।

অতিবিদ্যাদৃঢাভ্যাসো বিশেষবিত্তদাযিনী ॥ ১৪৮॥

অজরাঽমরকান্তিশ্চ কান্তিকোটিধরা শুভা।
পশুপাল পদ্মসংস্থ শ্রীশপাশুপতাঽস্ত্রদা ॥ ১৪৯॥

সর্বশাস্ত্রধরো দৃপ্তো জ্ঞানিনী জ্ঞানবর্ধীনী।
দ্বিতীযানাথ ঈশার্দ্ধো বাদরাযণমোহিনী ॥ ১৫০॥

শবমাংসাশনো ভীমো ভীমনেত্রা ভযানকা।
শিবজ্ঞানক্রমো দক্ষ ক্রিযাযোগপরাযণা ॥ ১৫১॥

দানস্থো দানসম্পন্নো দন্তুরা পার্বতীপরা।
প্রিযানন্দো দিবাকর্তা নিশানিষাদঘাতিনী ॥ ১৫২॥

অষ্টহস্তো বিলোলাক্ষো মনঃস্থাপনকারিণী।
মৃদুপুত্রো মৃদুচ্ছত্রো বিভাঽঙ্গপুণ্যনন্দিনী ॥ ১৫৩॥

অন্তরিক্ষগতো মূলো মূলপুত্রপ্রকাশিনী।
অভীতিদাননিরতো বিধুমালামনোহরী ॥ ১৫৪॥

চতুরাস্রজাহ্নবীশো গিরিকন্যা কুতূহলী।
শিশুপালরিপুপ্রাণো বিদেশপদরক্ষিণী ॥ ১৫৫॥

বিলক্ষণো বিধিজ্ঞাতা মানহন্ত্রী ত্রিবিক্রমা।

ত্রিকোণাননযোগীশো নিম্ননাভির্নগেশ্বরী ॥ ১৫৬॥

নবীন গুণসম্পন্নো নবকন্যাকুলাচলা।

ত্রিবিধেশো বিশঙ্কেতো বিজ্বরা জ্বরদাযিনী ॥ ১৫৭॥

অতিধামীকপুত্রশ্চ চারুসিংহাসনস্থিতা।

স্থাপকোত্তমবর্গাণাং সতাং সিদ্ধিপ্রকাশিনী ॥ ১৫৮॥

সিদ্ধপ্রিযো বিশালাক্ষো ধ্বংসকর্ত্রী নিরঞ্জনা।

শক্তীশো বিকলেশশ্চ ক্রতুকর্মফলোদযা ॥ ১৫৯॥

বিফলেশো বিযদ্গামী ললিতা বুদ্ধিবাহনা।

মলযাদ্রিতপ ক্ষেম ক্ষযকর্ত্রী রজোগুণা ॥ ১৬০॥

দ্বিরুগুকো দ্বারপালো বলেবীঘ্নবিনাশিনী।

মাযাপদ্মগতো মানো মারীবিদ্যাবিনাশিনী ॥ ১৬১॥

হিঙ্গুলাজস্থিত সিদ্ধো বিদুষাং বাদসারিণী।

শ্রীপতীশ শ্রীকরেশ শ্রীবিদ্যা ভুবনেশ্বরী ॥ ১৬২॥

মতিপ্রথমজো ধন্যো মিথিলানাথপুত্রিকা।

রামচন্দ্রপ্রিয প্রাপ্তো রঘুনাথকুলেশ্বরী ॥ ১৬৩॥

কূর্মঃ কূর্মগতো বীরো বসাবর্গা গিরীশ্বরী ।
রাজরাজেশ্বরীবালো রতিপীঠগুণান্তরা ॥ ১৬৪ ॥

কামরূপধরোল্লাসো বিদগ্ধা কামরূপিণী ।
অতিথীশ সর্বভর্তা নানালঙ্কারশোভিতা ॥ ১৬৫ ॥

নানালঙ্কারভূষাঙ্গো নরমালাবিভূষিতা ।
জগন্নাথো জগদ্ব্যাপী জগতামিষ্টসিদ্ধিদা ॥ ১৬৬॥

জগৎকামো জগদ্ব্যাপী জযন্তী জযদাযিনী ।
জযকারী জীবকারী জযদা জীবনী জযা ॥ ১৬৭॥

জযো গণেশ শ্রীদাতা মহাপীঠনিবাসিনী ।
বিষম সামবেদস্থো যজুর্বেদাংশযোগযা ॥ ১৬৮॥

ত্রিকালগুণগম্ভীরো দ্বাবিংশতিকরাম্বুজা ।
সহস্রবাহু সারস্থো ভাগগা ভবভাবিনী ॥ ১৬৯॥

ভবনাদিকরো মার্গো বিনীতা নযনাম্বুজা ।
সর্বত্রাকর্ষকোঽখণ্ড সর্বজ্ঞানাভিকর্ষীণী ॥ ১৭০॥

জিতাশযো জিতবিপ্রঃ কলঙ্কগুণবর্জীতা ।

নিরাধারো নিরালম্বো বিষযা জ্ঞানবর্জীতা ॥ ১৭১॥

অতিবিস্তারবদনো বিবাদখলনাশিনী ।

ভার্যানাথঃ ক্ষোভনাশো রিপূণাং কুলপূজিতা ॥ ১৭২॥

আশবো ভূরিবর্গাণাং চারুকুন্তলমণ্ডিতা ।

অতিবুদ্ধিধরো সূক্ষ্মো রজনীধ্বান্তনাশিনী ॥ ১৭৩॥

জ্যোৎস্নাজালকরো যোগী বিযোগশাযিনী যুগা ।

যুগগামী যোগগামী জযদা লাকিনী শিবা ॥ ১৭৪॥

সংজ্ঞাবুদ্ধিকরো ভাবো ভবভীতিবিমোহিনী ।

সুন্দর সুন্দরানন্দো রতিকারতিসুন্দরী ॥ ১৭৫॥

রতিজ্ঞানী রতিসুখো রতিনাথপ্রকাশিনী ।

বুদ্ধরূপী বোধমাত্রো বৈরোধো দ্বৈতবর্জীতা ॥ ১৭৬॥

ভূরিভাবহরানন্দো ভূরিসন্তানদাযিনী ।

যজ্ঞসাধনকর্তা চ সুযজ্ঞ পঞ্চমোচনা ॥ ১৭৭॥

কোটিকোটিচন্দ্রতেজঃ কোটিকোটিরুচিচ্ছটা ।

কোটিকোটিচঞ্চলাভো দ্বিকোট্যযুতচঞ্চলা ॥ ১৭৮॥

কোটিসূর্যাচ্ছন্নদেহ কোটিকোটিরবিপ্রভা ।
কোটিচন্দ্রকান্তমণি কোটীন্দুকান্তনির্মলা ॥ ১৭৯॥

শতকোটিবিধুমণি শতকোটীন্দুকান্তগা ।
বিলসৎকোটিকালাগ্নি কোটিকালানলোপমা ॥ ১৮০॥

কোটিবহ্নিগতো বহ্নি বহ্নিজায়া দ্বিগোদ্ভবা ।
মহাতেজো বহ্নিবারিঃ কালাগ্নিহারধারিণী ॥ ১৮১॥

কালাগ্নিরুদ্রো ভগবান্ কালাগ্নিরুদ্ররূপিণী ।
কালাত্মা কলিকালাত্মা কলিকা কুললাকিনী ॥ ১৮২॥

মৃত্যুজিতো মৃত্যুতেজা মৃত্যুঞ্জয়মনুপ্রিয়া ।
মহামৃত্যুহরো মৃত্যুঽপমৃত্যুবিনাশিনী ॥ ১৮৩॥

জয়ো জয়েশো জয়দো জয়দা জয়বর্ধিনী ।
জয়করো জগদ্ধর্মো জগজ্জীবনরক্ষিণী ॥ ১৮৪॥

সর্বজিত্ সর্বরূপী চ সর্বদা সর্বভাবিনী ।
ইত্যেতত্ কথিতং নাথ মহাবিদ্যাভিধানকম্ ॥ ১৮৫॥

শব্দব্রহ্মময়ং সাক্ষাত্ কল্পবৃক্ষস্বরূপকম্ ।
অষ্টোত্তরসহস্রাখ্যং শতসংখ্যাসমাকুলম্ ॥ ১৮৬॥

ত্রৈলোক্যমঙ্গলক্ষেত্রং সিদ্ধবিদ্যাফলপ্রদম্ ।
সকলং নিষ্কলং সাক্ষাত্ কল্পদ্রুমকলান্বিতম্ ॥ ১৮৭॥

যোগিনামাত্মবিজ্ঞানমাত্মজ্ঞানকরং পরম্ ।
যঃ পঠেদ্ ভাবসম্পূর্ণো মিথ্যাধর্মবিবর্জীতঃ ॥ ১৮৮॥

রুদ্রপীঠে স্বয়ং ভূত্বা মহাযোগী ভবেদ্ধ্রুবম্ ।
অকস্মাৎসিদ্ধিমাপ্নোতি চাধমাম্মাল্যদাযিনীম্ ॥ ১৮৯॥

রাজলক্ষ্মীধনৈশ্বর্যমতিধৈর্য হয়াদিকম্ ।
কুঞ্জরং সুন্দরং বীরং পুত্রং রাজ্যং সুখং জযম্ ॥ ১৯০॥

রাজরাজেশ্বরত্বং চ দিব্যবাহনমেব চ ।
অক্লেশপঞ্চমাসিদ্ধিং ততঃ প্রাপ্নোতি মধ্যমাম্ ॥ ১৯১॥

অত্যন্তদুঃখহননং গুরুত্বং লোকমণ্ডলে ।
দেবানাং ভক্তিসংখ্যাঞ্চ দিব্যভাবং সদা সুখম্ ॥ ১৯২॥

আযুর্বৃদ্ধিং লোকবশ্যং পূর্ণকোশং হি গোধনম্ ।

দেবানাং রাজ্যভবনং প্রত্যক্ষে স্বপ্নকালকে ॥ ১৯৩॥

দীর্ঘদৃষ্টিভযত্যাগং চাল্পকার্যবিবর্জিতম্ ।

সদা ধর্মপ্রিযত্বং চ ধর্মজ্ঞানং মহাগুণম্ ॥ ১৯৪॥

বিবেকাঙ্কুরমানন্দং শ্রীবাণীসুকৃপান্বিতম্ ।

তত উত্তমযোগস্থাং সিদ্ধিং প্রাপ্নোতি সাধকঃ ॥ ১৯৫॥

অনন্তগুণসংস্থানং মাযার্থভূতিবর্জনম্ ।

একান্তস্থানবসতিং যোগশাস্ত্রনিযোজনম্ ॥ ১৯৬॥

সর্বাকাঙ্ক্ষাবিশূন্যত্বং দৈবতৈকান্তসেবনম্ ।

খেচরত্বং সর্বগতিং ভাবসিদ্ধিং সুরপ্রিযম্ ॥ ১৯৭॥

সদা রৌদ্রক্রিযাযোগং বিভূত্যষ্টাঙ্গসিদ্ধিদম্ ।

দৃঢজ্ঞানং সর্বশাস্ত্রকারিত্বং রসসাগরম্ ॥ ১৯৮॥

একভাবং দ্বৈতশূন্যং মহাপদনিযোজনম্ ।

মহাগুণবতীবিদ্যাপতিত্বং শান্তিমেব চ ॥ ১৯৯॥

প্রাপ্নোতি সাধকশ্রেষ্ঠো যঃ পঠেদ্ ভাবনিশ্চলঃ ।

ত্রিকালমেককালং বা দ্বিকালং বা পঠেত্ সুধীঃ ॥ ২০০॥

*Stotram Digitalized By Sanskritdocuments.org*

শতমষ্টোত্তরং চাস্য পুরশ্চর্যাবিধিঃ স্মৃতঃ ।

পুরশ্চরণমাকৃত্য পঠিত্বা চ পুনঃ পুনঃ ॥ ২০১॥

অষ্টৈশ্বর্যযুতো ভূত্বা মনোগতিমবাপ্নুযাত্ ।

সর্বত্র কুশলং ব্যাপ্তং যঃ পঠেন্নিযতঃ শুচিঃ ॥ ২০২॥

ষটচক্রমণিপীঠঞ্চ ভিত্ত্বাঽনাহতগো ভবেত্ ।

অনাহতং ততো ভিত্ত্বা বিশুদ্ধসঙ্গমো ভবেত্ ॥ ২০৩॥

বিশুদ্ধপদ্মং ভিত্ত্বা চ শীর্ষে দ্বিদলগো ভবেত্ ।

দ্বিদলাদিমহাপদ্মং ভিত্ত্বৈতত্ স্তোত্রপাঠতঃ ॥ ২০৪॥

চতুর্বর্গাং ক্রিযাং কৃত্বা চান্তে নির্বাণমোক্ষভাক্ ।

যোগিনাং যোগসিদ্ধ্যর্থে সর্বভূতদযোদযম্ ॥ ২০৫॥

নির্বাণমোক্ষসিদ্ধ্যর্থে কথিতং পরমেশ্বর ।

এতৎস্তবনপাঠেন কিং ন সিদ্ধ্যতি ভূতলে ॥ ২০৬॥

কুলং কুলক্রমেণৈব সাধযেদ্ যোগসাধনম্ ।

যোগান্তে যোগমধ্যে চ যোগাদ্যে প্রপঠেত্ স্তবম্ ॥ ২০৭॥

কৃত্তিকারোহিণীযোগযাত্রাযাং মিথুনে তথা ।

শ্রবণাযাং মেষগণে কুজে চেন্দুসমাকুলে ॥ ২০৮॥

শনিবারে চ সঙ্ক্রান্ত্যাং কুজবারে পুনঃ পুনঃ ।

সন্ধ্যাকালে লিখেত্ স্তোত্রং ধ্যানধারণযোগিরাট্ ॥ ২০৯॥

ভূর্জপত্রে লিখিত্বা চ কণ্ঠে শীর্ষে প্রধারযেত্ ।

অথবা রাত্রিযোগে চ কুলচক্রে লিখেত্ সুধীঃ ॥ ২১০॥

সর্বত্র কুলযোগেন পঠন্ সিদ্ধিমবাপ্নুযাত্ ।

এতন্নাম্না প্রজুহুযাত্ কালিকাকৃতিমান্ ভবেত্ ॥ ২১১॥

তদ্দশাংশক্রমেণৈব হুত্বা যোগীহ সর্বদা ।

মণিপূরে দৃঢো ভূত্বা রুদ্রশক্তিকৃপাং লভেত্ ॥ ২১২॥

॥ ইতি শ্রীরুদ্রযামলে উত্তরতন্ত্রে

লাকিনীশাষ্টোত্তরশতসহস্রনামস্তোত্রং সম্পূর্ণম্ ॥

Encoded by Mark S.G. Dyczkowski muktAbodha

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ৃoday

http://sanskritdocuments.org

Lakini Sahasranama Stotram Lyrics in Bengali PDF
% File name : lAkinIsahasra.itx
% Category : sahasranAma
% Location : doc_devii
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Mark S.G. Dyczkowski muktAbodha
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : rudrayAmale uttaratantre bhairava bhairavI sa.nvAde
% Latest update : May 25, 2008
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 15, 2015 ] at Stotram Website